**तोयविम्ब** न० तोयोत्थितं विम्बम् अर्द्धडिम्बाकारं वस्तु। जलविम्बे जलोपरिभासमाने अर्द्धगोलाकारे पदार्थे। अयं शब्दः तोयवल्लीशब्दात् परं पाठ्यः।

**तोयात्मन्** पु० तोयमात्मा स्वरूपं यस्य तत्प्रकृतित्वात्। १परमेश्वरे।"यस्य केशेषु जीमूताः। नद्यः सर्वाङ्गसन्धिषु कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः" विष्णुस्तुतिः।

**तोयाधार** पु० ६त०। १जलाशये। जलाशयोत्सर्गशब्दे ३०७५ पृ० तद्भेदादि दृश्यम्।"तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः" शकु०।

**तोयाधिवासिनी** स्त्री तोयं तोयार्द्रं देशमधिवसति अधि+वस–णिनि ङीप्। पाटलावृक्षे रत्नमाला।

**तोयेश** पु० ६त०। १वरुणे तदधिदेवताके २शतभिषानक्षत्रे च। तोयं जलमधिदेवोऽस्य। ३पूर्वाषाढानक्षत्रे न०।

**तोरण** पुंन०। तुर–युच आधारे ल्युट् तोलयत्यनेन तुल–उन्माने करणे–ल्युट् लस्य रो वा। बहिः स्थिते १द्वारे। "अथोच्चकैस्तोरणसङ्गभङ्गेति" "गणो नृपाणामथ तोरणाद्बहिः" माघः। "भासोज्ज्वलत्काञ्चनतोरणानाम्" कुमा०। तच्च द्वाराग्रे निखातस्तम्भोपरिनिबद्धो धनुराकारः (फटक) इति ख्यातः पदार्थः। यागादौ मण्डपाद्बहिर्द्वाररूपस्य तोरणस्य काष्ठविशेषप्रमाणादिकं मण्डपशब्दे दृश्यं मत्कृततुलादानादिपद्धतौ विस्तरो दृश्यः। २कण्धरायां न० हारा०।

**तोरश्रवस्** पु० अङ्गिरोमुनौ।

**तोल** पुंन०। चु० तुल–कर्म्मणि अच्। अशीतिरक्तिकामाने १कर्षे। "एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम्। इतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम्" आगमः। स्वार्थे क। तत्रार्थे "पलं तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम्। तोलकत्रितयं ज्ञेयम्" तिथित०।

**तोल्य** त्रि० तुल+उन्माने कर्म्मणि–यत्।१तोलनीये। भावे यत्। २तोलने न०। "जीवानां वयसां मौल्ये तोल्ये वर्णस्य हेमनि" लीला०।

**तोश** पु० तुश–वधे भावे घञ्। १हिंसायाम्। कर्त्तरि अच्। २हिंसके "त्वे राय इन्द्र! तोशतमाः" ऋ०१।१६९।५। "तोशतिर्वधकर्मा नितोशयति निबर्हयतीति तन्नामसु पाठात् तोशतमाः नाशयितृतमाः" भा०। "तोशा वृत्रहणा हुवे" ऋ० ३।१२।४। "तोशा बाधकौ" भा०। औस्थाने आच्। [भा०उ०२९अ०।

**तोष** पु० तुष–भावे घञ्। सन्तोषे। "तोषपरो हि लाभः"

**तोषण** न० तुष–भावे ल्युट्। १सन्तोषे। तुष–णिच् भावे ल्युट्। २सन्तोषोत्पादने। "एतावदेव पुरुषैः कार्य्यं हृदयतोषणम्" भा०स०१६अ०। कर्त्तरि ल्यु। ३सन्तोषजनके त्रि० "पश्यन्तु हृदयतोषणान्" भा० उ० ८३ अ०। करणे ल्युट्। ४तोषसाधने स्त्रियां ङीप् तोषणी।

**तोषल** न० तोषं लुनाति लू–बा० ड। अस्त्रभेदे १मुषलेऽस्त्रे "कृष्णस्तोषलमुद्यम्य गिरिकूटोपमं बली" हरिवं०८७अ०।

**तौक्षिक** पु०धनूराशौ दीपिका कौर्प्यशब्दे २२७८पृ०दृश्यम्।

**तौतातिक** न० तुतातभट्टेन निर्वृत्तम् ठञ्। तुतातभट्टकृतशास्त्रे "नैवाश्रावि गुरोर्मतं न विदितं तौतातिकं दर्शनम्" प्रबोधच०।

**तौतिक** न० १मुक्तायां २शुक्तौ च राजनि०।

**तौदी** स्त्री विषनाशके ओषधिभेदे घृतकुमार्य्याम्।"तौदी नामासि कन्या घृताची वा असि" अथ० १९।४।४२।

**तौम्बुरविन्** पु० ब०व०। तुम्बुरुणा कलाप्यन्तेवासिना प्रोक्तमधीयते इनि। कलाप्यन्तेवासिना तुम्बुरुणा प्रोक्तशाखाध्येतृषु।

**तौर** न० यागभेदे।"संवत्सरमष्टरात्रस्तौरेण यजेत" लाट्या० श्रौ० १०।२०।१। "दार्षद्वततौरयोर्व्रतानि" १०।१८।१०। तत्रैव।

**तौरयान** न० तूर्णं यानमस्य पृषो०। तूर्णगमनयुक्ते। "स तौरयान उपयाहि यज्ञम्" निरुक्ते ५।१५। श्रुतिः तौरयानः तूर्णयानः "तौरयान इत्यपि" निगमो भवति"

**तौरश्रवस** न०तोरश्रवसाऽङ्गिरसा दृष्टं साम अण्। सामभेदे "तौरश्रवसे माध्यन्दिने पवमाने तदावपनश्रुतेः" कात्या० श्रौ० २५।१४।१४। "तौरश्रवसे सामनी" कर्कः।

**तौर्य्य** न० तूर्ये मुरजादौ वाद्ये भवम् अण्। मुरजादिध्वनौ।

**तौर्य्यत्रिक** न० त्रयः परिमाणमस्य कन् तौर्य्योपलक्षितं त्रिकम्। समुदितेषु नृत्यगीतवाद्येषु अमरः। "वनेऽपि तौर्य्यत्रिकमारराध तम्" नैषधम्।"तौर्य्यत्रिकं वृथाट्या कामजो दशको गणः" मनुः।

**तौल** न० तुलैव तुला+स्वार्थे अण् स्वार्थिका अपि प्रत्ययाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेः देवतादिवत् क्लीवता। मानभेदे १तुलायाम् २उन्मानदण्डे ३तुलाराशौ च ज्यो०।

**तौलिक** पु०तूल्या जीवति तूली+ठक्। चित्रकरे शब्दमाला।

**तौलिकिक** पु० तूलिकया जीवति ठक्। चित्रकरे हेमच०।